प्राचीन व्याकरणम्
कोड -- 1102
प्रश्नबैंक

1)'अष्टाध्यायी' इति ग्रन्थस्य लेखकः अस्ति ?
2) 'अष्टाध्यायी' इति ग्रन्थे अध्यायाः सन्ति ?
3) 'अष्टाध्यायी' इति ग्रन्ये पादाः सन्ति ?
4) अष्टाध्यायी इति ग्रन्थस्य एकस्मिन् अध्याये पादाः सन्ति ?
5) सूत्रकार : कः ?
6) वार्तिककार : कः ?
7) भाष्यकारः कः ?
8) सूत्रं कतिविधम् ?
9) माहेश्वर सूत्राणि सन्ति ?
10) पाणिनेः मातुः नाम किम् ?
11) काशिकाकारौ कौ ?
12) 'काशिका' इत्यत्र कः धातुः?
13) 'काशिका' ग्रन्थस्य रचना कुत्र बभूव ?
14 ) उगवादिभ्यो.........प्रत्ययः अस्ति ?

15)"तस्मै हितम्" इति सूत्रे तस्मै इत्यत्र का विभक्तिः ?

16) अजाविभ्यां.........प्रत्ययः अस्ति ?

17) तदर्थं विकृतेः............ इति सूत्रं पूरय ?

18) संख्याया अतिशदन्ताया: प्रत्यय: अस्ति ?

19) पात्र शब्दात् प्रत्यय: अस्ति ?

20) दण्ड्यः इत्यत्र प्रत्यय: अस्ति ?

21) तेन तुल्य क्रिया........इति सूत्रं पूरय ?

22) तस्यभावस्....... इति सूत्रं पूरय ?

23) मित्रावरुणीयम् इत्यत्र प्रत्ययः अस्ति ?

24) शालेयम् इत्यत्र प्रत्ययः अस्ति ?

25) 'संख्यायाम् अवयवे तयप्' इति सूत्रेण प्रत्यय: भवति ?

26) थट् च........इति सूत्रं पूरय ?

27) नित्यशताधिमासार्धमास......... इति सूत्रं पूरय ?

28) 'गोषदक' इत्यत्र प्रत्ययः अस्ति ?

29) दन्त उन्नत ' इति सूत्रं पूरय ?

30) 'दन्तुरः' इत्यत्र प्रत्ययः भवति ?

31) कस्या: विभक्तेः तसिल् प्रत्ययः भवति ?

32 ) स्थूलादिभ्यः प्रकार वचने-" इति सूत्रेण प्रत्ययःभवति ?

33) लिटिधातो....... इति सूत्रं पूरय ?

34) 'इकोयणचि' इति सूत्रेण सन्धिः भवति ?

35) 'एचोऽयवायाव:' इति कस्य सन्धे : सूत्रम् ?

36) गुणसन्धेः सूत्रं किम् ?

37) 'तवेदम्' इत्यत्र सन्धिः भवति ?

38 ) 'वृद्धिरेचि' इत्यनेन सूत्रेण सन्धिः भवति ?

39) 'ब्रह्म + ओदनः' इति भवति ?

40) दीर्घसन्धेः सूत्रं किम् ?

41) 'अग्नेऽत्र' इत्यत्र सन्धिः अस्ति ?

42) पूर्वरूप सन्धेः सूत्रं भवति ?

43) 'अकर्मधारये' इति सूत्रं पूरय ?

44) 'मनसः........ इति सूत्रं पूरय ?

45 ) "ढ्रलोपे पूर्वस्य दीर्घोऽण:" इत्यनेन सूत्रेण किं विधीयते ?

46) 'विश्वावसुः' इत्यत्र 'विश्व इति उत्तरपदस्य दीर्घः केन सूत्रेण भवति ?

47) थलि च...........इति सूत्रं पूरय ?

48) गाथिविदथिकेशिगनि.........." इति सूत्रं पूरय ?

49) यु वु इत्यनयोः स्थाने क्रमाद् आदेशो भवति ?

50) यु स्थाने अन वु स्थाने अक इति केन सूत्रेण भवति ?

51) आयनेयीनीयियः............ इति सूत्रं पूरय?

52) युग्ममेलनं कुरुत --

फस्य -- आयन

ढस्य ---- एय

खस्य --- ईन्

छस्य --- ईय्

घस्य --- इय्

53) 'नाडायनः' इत्यत्र प्रत्ययः भवति ?

54) 'वैनतेयः' इत्यत्र प्रत्ययः भवति ?

55) 'आढ्यकुलीनः' इत्यत्र प्रत्ययः भवति ?

56) 'गार्गीयः' इत्यत्र प्रत्ययः भवति ?

57) 'क्षत्रियः' इत्यत्र प्रत्ययः भवति ?

58) 'भ्यसः' इत्यस्य आदेशो भवति ?

59) तुह्योस्तातङ्ङा....... इति सूत्रं पूरय ?

60) विद् ज्ञाने इत्यस्माद् धातोः शतुः इत्यस्य आदेशो भवति ?

61) सिचिवृद्धिः.......... इति सूत्रं पूरय ?

62) 'पचमानः' इत्यत्र मुगागमः केन सूत्रेण भवति ?

63)' मार्ष्टि ' इत्यत्र वृद्धिः केन सूत्रेण भवति ?
64) किम् इत्यस्य कः भवति ?
65) ठस्य कः आदेशो भवति ?
66) 'न्यग्रोधश्च.... इति सूत्रं पूरय ?
67) देवता....... इति सूत्रं पूरय ?
68)'वो विधूनने जुक्' इत्यनेन सूत्रेण आगमो भवति ?
69)'भियोहेतुभयेषुक्' इत्यनेन सूत्रेण आगमो भवति ?
70)मिदेः अङ्गस्य इको शिति प्रत्यये परतः किं भवति ?
71) गुणोर्ति..... इति सूत्रं पूरय ?
72) अनो नुट् भवति कस्मिन् विषये ?
73)कृप धातो: रेफस्य लकारादेशो केन सूत्रेणभवति ?
74) चोः किं भवति ?
75) होः किं भवति ?
76) नहो हस्य किं भवति ?
77) 'शुषः..... इति सूत्रं पूरय?
78) पचो...... इति सूत्रं पूरय ?
79) 'क्षामः' इत्यत्र मकारादेशः केन सूत्रेण भवति ?
80) हैहे प्रयोगे... इति सूत्रं पूरय?
81) रेफवकारान्तस्य धातोः पदस्य उपधायाः इकः दीर्घो भवति केन सूत्रेण.?

82) 'ढो ढे लोपः' इत्यनेन भवति ?

83) 'रोरि' इत्यनेन भवति ?

84) व्योर्लघुप्रयत्नतरः...... इति सूत्रं पूरय ?

85) लोपः........ इति सूत्रं पूरय ?

86) स्तोः श्चुना..... इति सूत्रं पूरय ?

87) तत् + लयः इति मिलित्वा भवति ?

88) 'वाक्छेते' इत्यत्र छत्वं केन सूत्रेण भवति ?

89) अष्टाध्याय्याः अन्तिमं सूत्रं किम् ?

आम् न

90) पूरणार्धाट ठन प्रत्ययो भवति ?

91) पत्यन्तपुरोहितादिभ्यो यक् प्रत्ययो भवति ?

92) पञ्चम्याः तसिल् प्रत्ययो भवति ?

93) कालात् इत्यत्र पञ्चमी विभक्तिः ?

94) 'पूर्वोभ्यासः' इत्यनेन अभ्यास संज्ञा भवति ?

95)अभ्यस्त संज्ञाभवति 'उभे अभ्यस्तम्' इति सूत्रेण ?

96) 'मालादीनां च' इति सूत्रेण आदिरुदात्तो भवति ?

97) 'इकः कारो' इति सूत्रेण उपसर्गस्य उत्तरपद दीर्घो भवति ?

98) अनुशाधि इत्यत्र आङ् उपसर्गः अस्ति ?
99) ह्रस्वनद्यापो मुट भवति ?
100) 'शदेरगतो तः इति सूत्रेण नकारादेशो भवति ?
101 ) तिष्ठतेरित' इति सूत्रेण उकारादेशो भवति ?
102 'छन्दसि' इत्यत्र प्रथमा विभक्तिः अस्ति ?
103) नहो हकारस्य धकारादेशो झलि परे प्रारम्भे भवति ?
104) मोऽनुस्वारः' इत्यनेन विसर्गः भवति ?
105) 'ष्टुना ष्टुः'इत्यनेन श्चुत्वं भवति ?
106) आशीतिकम्' इत्यत्र 'केन सूत्रेण कः प्रत्ययो भवति ?
107) व्रीहि शालि शब्दाभ्यां ढक् प्रत्ययो केन सूत्रेण भवति ?
108) कुतः, यतः, ततः इत्यादिषु कः प्रत्ययः ? केन सूत्रेण भवति ?
109)'अणुकः ' इत्यत्र कन् प्रत्ययः केन सूत्रेणभवति ?
110) लिटिधातोरनभ्यासस्य' इति सूत्रेण किं भवति ?
111) तस्मान्नुडचि' इति सूत्रस्य पदच्छेदः कः ?
112) 'श्नान्नलोपः' इति कति पदात्मकं सूत्रम् ?
113) सर्वनाम्नः उत्तरस्य ङेः कः आदेशो भवति ?

114) ' इदितो नुम् धातोः' इत्यनेन सूत्रेण नुमागमः कस्याम् अवस्थायां भवति ?

115) 'ग्रहीतुम्' इत्यत्र दीर्घः केन सूत्रेण भवति ?

116) 'लोपः पिबतेरीच्चाभ्यासस्य' इति कति पदात्मकं सूत्रम् ?

117) गतिः गतौ परतः किं भवति ?

118) संयोगान्तस्य पदस्य लोपः केन सूत्रेण भवति ?

119) ङमुट् आगमः केन सूत्रेण भवति ?

120) त्रिप्रभृतिषु वर्णेषु संयुक्तेषु कस्य मतेन द्वित्वं न भवति ?

121) युग्ममेलन कुरुत --

उगवादिभ्यः --- यत्
वैहेयम् --- ढक्
इदम् --- इश्
स्थूलादिभ्यःप्रकारवचने --- कन्
एकाचो द्वे ---- प्रथमस्य
अजादेः --- द्वितीयस्य

122) तत्पुरुषे कृतिः -' इति सूत्रं पूरय ?

123) 'उदुपधाया गोः' इत्यनेन सूत्रेण किं भवति ?

124) 'जिघ्रतेर्वा' इत्यनेन सूत्रेण किं भवति?

125) 'उपसर्गस्य अयतौ' इति सूत्रेण किं भवति ?

126 )ओकारादुत्तरस्य यकारस्य लोपो भवति कस्य मते ?

127)'पूर्वाह्णः' इत्यत्र णकारादेशः केन सूत्रेण भवति ?

128) ' दूराद्धूते च ' इति कति पदात्मकं सूत्रम् ?

129) 'तासस्त्योः.. इति सूत्रं पूरय ?

130) 'अनुदात्तं पदमेकवर्जम्' कीदृशं सूत्रम् ?

131) 'शरीरावयवाद्यत' इति सूत्रस्य काशिकानुसारेण व्याख्यां कुरुत?

132) 'आयनेयीनीयियःफढखछघां प्रत्ययादीनाम्' इति सूत्रस्य व्याख्यां कुरुत ?

133) 'इकोयणचि' इति सूत्रेण किं भवति ? उदाहरणानुसारेण दध्यत्र, मध्वत्र इति रूपद्वयं साधय ?

134) एचोऽयवायावः' इति सूत्रे एचः इत्यत्र कीदृशी षष्ठी ? ए ओ ऐ औ इत्येतेषां स्थाने के आदेशाः भवन्ति ?

135) उपेन्द्रः, गङ्गोदकम् इति शब्दद्वयं साधय ?

136) 'वृद्धिरेचि' इति सूत्रस्य उदाहरणानुसारं व्याख्यां कुरुत ?

137)प्राच्र्छति इत्यत्र वृद्धि:केन सूत्रेण विधीयते ?
138) दैत्यारि:, श्रीश:, विष्णूदय: इत्येतेषां शब्दानां सिद्धिं कुरुत?
139) 'गवाग्रम्' इति शब्दस्य सिद्धिं कुरुत ?
140) 'स्तो: श्चुना श्चु:' इति सूत्रस्य उदाहरणानुसारं व्याख्यां कुरुत ?
141) 'झलां जशोऽन्ते' इति सूत्रेण किं विधीयते ? वागीश इति शब्दस्य सिद्धिं कुरुत ?
142) 'उत्थानम्' इति शब्दस्य सिद्धिं कुरुत ?
143) 'छे च' इति सूत्रस्य व्याख्यां कुरुत ?
144) 'पदान्ताद्वा' इति सूत्रस्य व्याख्यां कुरुत् ?
145) 'हशि च' इत्यनेन सूत्रेण किं विधीयते ? उदाहरणानुसारं लिखत ?
146) ' रोरि' इति सूत्रस्य व्याख्यां कुरुत ?
147) 'पदान्तस्य' इति सूत्रस्य व्याख्यां कुरुत ?
148) 'ह्रस्वनद्यापो नुट्' इति सूत्रेण किं विधीयते ?
149) 'नामि' इति सूत्रस्य उदाहरणानुसारं व्याख्यां कुरुत ?
150) 'जस:शी' इति सूत्रेण किं विधीयते ? उदाहरणानुसारं लिखत ?